# Natya Shastra Chapter 24

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૪

## Document Information

Text title : naaTyashaastra adhyaaya 24

File name : natya24.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : November 23, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

Natya Shastra Chapter 24

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૪

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

ચતુર્વિંશોઽધ્યાયઃ

સમાસતસ્તુ પ્રકૃતિસ્ત્રિવિધા પરિકીર્તિતા ।
પુરુષાણામથ સ્ત્રીણામુત્તમાધમમધ્યમા ॥ ૧॥

જિતેન્દ્રિય જ્ઞાનવતી નાનાશિલ્પવિચક્ષણા ।
દક્ષિણાધમહાલક્ષ્યા ભીતાનાં પરિસાન્ત્વની ॥ ૨॥

નાનાશાસ્ત્રાર્થસમ્પન્ના ગામ્ભીર્યૌદાર્યશાલિની ।
સ્થૈર્યત્યાગગુણોપેતા જ્ઞેયા પ્રકૃતિરુત્તમા ॥ ૩॥

લોકોપચારચતુરા શિલ્પશાસ્ત્રવિશારદા ।
વિજ્ઞાનમાધુર્યયુતા મધ્યમા પ્રકૃતિઃ સ્મૃતા ॥ ૪॥

રૂક્ષવાચોઽથ દુઃશીલાઃ કુસત્ત્વાઃ સ્થૂલબુદ્ધયઃ ।
ક્રોધનાઘાતકાશ્ચૈવ મિત્રઘ્નાશ્છિદ્રમાનિનઃ ॥ ૫॥

પિશુનાસ્તૂદ્ધતૈર્વાક્યૈરકૃતજ્ઞાસ્તથાલસાઃ ।
માન્યામાન્યા વિશેષજ્ઞા સ્ત્રીલોલાઃ કલહપ્રિયાઃ ॥ ૬॥

સૂચકાઃ પાપકર્માણઃ પરદ્રવ્યાપહારિણઃ ।
એભિર્દોષૈસ્તુસમ્પન્ના ભવન્તીહાધમા નરાઃ ॥ ૭॥

એવં તુ શીલતો નૃણાં પ્રકૃતિસ્ત્રિવિધા સ્મૃતા ।
સ્ત્રીણાં પુનશ્ચ પ્રકૃતિં વ્યાખ્યાસ્યામ્યનુપૂર્વશઃ ॥ ૮॥

મૃદુભાબા ચાચપલા સ્મિતભાષિણ્યનિષ્ઠુરા ।
ગુરૂણાં વચને દક્ષા સલજ્જા વિનયાન્વિતા ॥ ૯॥

રૂપાભિજનમાધુર્યૈર્ગુણૈઃ સ્વાભાવિકૈર્યુતા ।

ગામ્ભીર્યધૈર્યસમ્પન્ના વિજ્ઞેયા પ્રમદોત્તમા ॥ ૧૦॥

નાત્યુત્કૃષ્ટૈરનિખિલૈરેભિરેવાન્વિતા ગુણૈઃ ।
અલ્પદોષાનુવિદ્ધા ચ મધ્યમા પ્રકૃતિઃ સ્મૃતા ॥ ૧૧॥

અધમા પ્રકૃતિર્યા તુ પુરુષાણાં પ્રકીર્તિતા ।
વિજ્ઞેયા સૈવ નારીણામધમાનાં સમાસતઃ ॥ ૧૨॥

નપુંસકસ્તુ વિજ્ઞેયઃ સંકીર્ણોઽધમ એવ ચ ।
પ્રેષ્યાદિરપિ વિજ્ઞેયા સંકીર્ણા પ્રકૃતિર્દ્વિજાઃ ॥ ૧૩॥

શકારશ્ચ વિટશ્ચૈવ યે ચાન્યેપ્યેવમાદયઃ ।
સંકીર્ણાસ્તેઽપિ વિજ્ઞેયા હ્યધમા નાટકે બુધૈઃ ॥ ૧૪॥

એતા જ્ઞેયાઃ પ્રકૃતયઃ પુરુષસ્ત્રીનપુંસકૈઃ ।
આસાં તુ સમ્પ્રવક્ષ્યામિ વિધાનં શીલસંશ્રયમ્ ॥ ૧૫॥

અત્ર ચત્વાર એવ સ્યુર્નાયકાઃ પરિકીર્તિતાઃ ।
મધ્યમોત્તમપ્રકૃતૌ નાનાલક્ષણલક્ષિતાઃ ॥ ૧૬॥

ધીરોદ્ધતા ધીરલલિતા ધીરોદાત્તાસ્તથૈવ ચ ।
ધીરપ્રશાન્તકાશ્ચૈવ નાયકાઃ પરિકીર્તિતાઃ ॥ ૧૭॥

દેવા ધીરોદ્ધતા જ્ઞેયાઃ સ્યુર્ધીરલલિતા નૃપાઃ ।
સેનાપતિરમાત્યશ્ચ ધીરોદાત્તૌ પ્રકીર્તિતૌ ॥ ૧૮॥

ધીરપ્રશાન્તા વિજ્ઞેયા બ્રાહ્મણા વાણિજસ્તથા ।
એતેષાં તુ પુનર્જ્ઞેયાશ્ચત્વારસ્તુ વિદૂષકઃ ॥ ૧૯॥

લિંગી દ્વિજો રાજજીવી શિષ્યશ્ચેતિ યથાક્રમમ્ ।
દેવક્ષિતિભૃતામાત્યબ્રાહ્મણાનાં પ્રયોજયેત્ ॥ ૨૦॥

વિપ્રલંભસુહૃદોમી સંકથાલાપપેશલાઃ ।
વ્યસની પ્રાપ્ય દુઃખં વા યુજ્યતેઽભ્યુદયેન યઃ ॥ ૨૧॥

તથા પુરુષમાહુસ્તં પ્રધાનં નાયકં બુધાઃ ।
યત્રાનેકસ્ય ભવતો વ્યસનાભ્યુદયૌ પુનઃ ॥ ૨૨॥

સપુષ્ટૌ યત્ર તૌ સ્યાતાં ન ભવેત્તત્ર નાયકઃ ।
દિવ્યા ચ નૃપપત્ની ચ કુલસ્ત્રી ગણિકા તથા ॥ ૨૩॥

એતાસ્તુ નાયિકા જ્ઞેય નાનાપ્રકૃતિલક્ષણાઃ ।
ધીરા ચ લલિતા ચ સ્યાદુદાત્તા નિભૃતા તથા ॥ ૨૪॥

દિવ્યા રાજાઙ્ગનાશ્ચૈવ ગુણૈર્યુક્તા ભવન્તિ હિ ।
ઉદાત્તા નિભૃતા ચૈવ ભવેત્તુ કુલજાઙ્ગના ॥ ૨૫॥

લલિતે ચાભ્યુદાત્તે ચ ગણિકાશિલ્પકારિકે ।
[પ્રકૃતીનાં તુ સર્વાસામુપચારાદ્ દ્વિધા સ્મૃતાઃ ॥ ૨૬॥

બાહ્યશ્ચાભ્યન્તરશ્ચૈવ તયોર્વક્ષ્યામિ લક્ષણમ્ ।
તત્ર રાજોપચારો યો ભવેદાભ્યન્તરો હિ સઃ ॥ ૨૭॥

તતો વાક્યોપચારસ્તુ યસ્ય બાહ્યઃ સ ઉચ્યતે ।
અથ રાજોપચારે ચ રાજ્ઞામન્તઃપુરાશ્રિતમ્ ॥ ૨૮॥

સ્ત્રીવિભાગં પ્રવક્ષ્યામિ વિભક્તમુપચારતઃ । ]
રાજોપચારં વક્ષ્યામિ હ્યન્તઃપુરસમાશ્રયમ્ ॥ ૨૯॥

મહાદેવી તથા દેવ્યઃ સ્વામિન્યઃ સ્થાપિતા અપિ ।
ભોગિન્યઃ શિલ્પકારિણ્યો નાટકીયાઃ સનર્તકાઃ ॥૩૦॥

અનુચારિકાશ્ચ વિજ્ઞેયાસ્તથા ચ પરિચારિકાઃ ।
તથા સંચારિકાશ્ચૈવ તથા પ્રેષણકારિકાઃ ॥ ૩૧॥

મહત્તર્યઃ પ્રતીહાર્યઃ કુમાર્યઃ સ્થવિરા અપિ ।
આયુક્તિકાશ્ચ નૃપતેરયમન્તઃપુરો જનઃ ॥ ૩૨॥

અત્ર મૂર્ધાભિષિક્તા યા કુલશીલસમન્વિતા ।
ગુણૈર્યુક્તા વયસ્સ્થા ચ મધ્યસ્થા ક્રોધના તથા ॥ ૩૩॥

મુક્તેર્ષ્યા નૃપશીલજ્ઞા સુખદુઃખસહા સમા ।
શાન્તિસ્વસ્ત્યયનૈર્ભર્તુસ્સતતં મઙ્ગલૈષિણી ॥ ૩૪॥

શાન્તા પતિવ્રતા ધીરા અન્તઃપુરહિતે રતા ।
એભિર્ગુણૈસ્તુ સંયુક્તા મહદેવીત્યુદાહૃતા ॥ ૩૫॥

એભિરેવ ગુણૈર્યુક્તાસ્તત્સંસ્કારવિવર્જિતાઃ ।
ગર્વિતાશ્ચાતિસૌભાગ્યાઃ પતિસંભોગતત્પરાઃ । ૩૬॥

શુચિનિત્યોજ્વલાકારાઃ પતિપક્ષાભ્યસૂયકાઃ ।
વયોરૂપગુણાઢ્યા યાસ્તા દેવ્ય ઇતિ ભાષિતાઃ ॥ ૩૭॥

સેનાપતેરમાત્યાનાં ભૃત્યાનામથવા પુનઃ ।
ભવેયુસ્તનયા યાસ્તુ પ્રતિસમ્માનવર્જિતાઃ ॥ ૩૮॥

શીલરૂપગુણૈર્યાસ્તુ સમ્પન્ના નૃપતેર્હિતાઃ ।
સ્વગુણૈર્લબ્ધસમ્માના સ્વામિન્ય ઇતિ તાઃ સ્મૃતાઃ ॥ ૩૯॥

રૂપયૌવનશાલિન્યઃ કર્કશા વિભ્રમાન્વિતાઃ ।
રતિસંભોગકુશલાઃ પ્રતિપક્ષાભ્યસૂયકાઃ ॥ ૪૦॥

દક્ષા ભર્તુશ્ચ ચિત્તજ્ઞા ગન્ધમાલ્યોજ્વલાસ્સદા ।
નૃપતેશ્છન્દવર્તિન્યો ન હીર્ષ્યામાનગર્વિતાઃ ॥ ૪૧॥

ઉત્થિતાશ્ચ પ્રમત્તાશ્ચ ત્યક્તાલસ્યા ન નિષ્ઠુરાઃ ।
માન્યામાન્યવિશેષજ્ઞાઃ સ્થાપિતા ઇતિ તાઃ સ્મૃતાઃ ॥ ૪૨॥

કુલશીલલબ્ધપૂજામૃદવો નાતિચોદ્ભટાઃ ।
મધ્યસ્થા નિભૃતાઃ ક્ષાન્તા ભોગિન્ય ઇતિ તાઃ સ્મૃતાઃ ॥ ૪૩॥

નાનાકલાવિશેષજ્ઞા નાનાશિલ્પવિચક્ષણાઃ ।
ગન્ધપુષ્પવિભાગજ્ઞા લેખ્યાલેખ્યવિકલ્પિકાઃ ॥ ૪૪॥

શયનાસનભાગજ્ઞાશ્ચતુરા મધુરાસ્તથા ।
દક્ષાઃ સૌમ્યાઃ સ્ફુટાઃ શ્લિષ્ટા નિભૃતાઃ શિલ્પકારિકાઃ ॥ ૪૫॥

ગ્રહમોક્ષલયજ્ઞા યા રસભાવવિકલ્પિકાઃ ।
ચતુરાનાટ્યકુશલાશ્ચોહાપોહવિચક્ષણાઃ ॥ ૪૬॥

રૂપયૌવનસમ્પન્ના નાટકીયાસ્તુ તાઃ સ્મૃતાઃ ।
હેલાભાવવિશેષાઢ્યા સત્વેનાભિનયેન ચ । ૪૭॥

માધુર્યેન ચ સમ્પન્ના હ્યાતોદ્યકુશલા તથા ।
અઙ્ગપ્રત્યઙ્ગસમ્પન્ના ચતુષ્ષષ્ઠિકલાન્વિતા ॥ ૪૮॥

ચતુરાઃ પ્રશ્રયોપેતાઃ સ્ત્રીદોષૈશ્ચ વિવર્જિતાઃ ।
સદા પ્રગલ્ભા ચ તથા ત્યક્તાલસ્યા જિતશ્રમા ॥ ૪૯॥

નાનાશિલ્પપ્રયોગજ્ઞા નૃત્તગીતવિચક્ષણા ।
અથ રૂપગુણૌદાર્યધૈર્યસૌભાગ્યશીલસમ્પન્ના ॥ ૫૦॥

પેશલમધુરસ્નિગ્ધાનુનાદિકલચિત્રકણ્ઠા ચ ।

સમાગતાસુ નારીષુ રૂપયૌવનકન્તિભિઃ ॥ ૫૧॥

ન દૃશ્યતે ગુણૈર્સ્તુલ્યા યસ્યાઃ સા નર્તકી સ્મૃતા ।
સર્વાવસ્થોપચારેષુ યા ન મુઞ્ચતિ પર્થિવમ્। ॥ ૫૨॥

વિજ્ઞેયા દક્ષિણા દક્ષા નાટ્યજ્ઞૈરનુચારિકા ।
શય્યાપાલી છત્રધારી તથા વ્યજનધારિણી ॥ ૫૩॥

સંવાહિકા ગન્ધયોક્ત્રી તથા ચૈવ પ્રસાધિકા ।
તથાભરણયોક્ત્રી ચ માલ્યસંયોજિકા તથા ॥ ૫૪॥

એવં વિધા ભવેયુર્યાઃ તા જ્ઞેયાઃ પરિચારિકાઃ ।
નાનાકક્ષ્યા વિચારિણ્યઃ તથોઅપવનસંચરાઃ ॥ ૫૫॥

દેવતાયતનક્રીડા પ્રાસાદપરિચારિકાઃ ।
યામકિન્યસ્તથા ચૈવ યાશ્ચૈવં લક્ષણાઃ સ્ત્રિયઃ ॥ ૫૬॥

સંચારિકાસ્તુ વિજ્ઞેયા નાટ્યજ્ઞૈઃ સમુદાહૃતાઃ ।
પ્રેષણેઽકામસંયુક્તે ગુહ્યાગુહ્યસમુત્થિતે ॥ ૫૭॥

નૃપૈર્યાસ્તુ નિયુજ્યન્તે તાઃ જ્ઞેયાઃ પરિચારિકાઃ ।
સર્વાન્તઃપુરરક્ષાસુ સ્તુતિસ્વસ્ત્યયનેન ચ ॥ ૫૮॥

યા વૃદ્ધિમભિનન્દન્તિ તા વિજ્ઞેયા મહત્તરાઃ ।
સન્ધિવિગ્રહસંબદ્ધનાનાચારસમુત્થિતમ્ ॥ ૫૯॥

નિવેદયન્તિ યાઃ કાર્યં પ્રતિહાર્યસ્તુ તાઃ સ્મૃતાઃ ।
અપ્રાપ્તરસસંભોગા ન સંભ્રાન્તા ન ચોદ્ભટાઃ ॥ ૬૦॥

નિભૃતાશ્ચ સલજ્જાશ્ચ કુમાર્યો બાલિકાઃ સ્મૃતાઃ ।
પુર્વરાજનયજ્ઞા યાઃ પુર્વરાજાભિપૂજિતાઃ ॥ ૬૧॥

પુર્વરાજાનુચરિતાસ્તા વૃદ્ધા ઇતિ સુજ્ઞિતાઃ ।
ભાણ્ડાગારેષ્વધિકૃતાશ્ચાયુધાધિકૃતાસ્તથા ॥ ૬૨॥

ફલમૂલૌષધીનાં ચ તથા ચૈવાન્વવેક્ષકી ।
ગન્ધાભરણવસ્ત્રાણાં માલ્યાનાં ચૈવ ચિન્તિકા ॥ ૬૩॥

બહ્વાશ્રયે તથા યુક્તા જ્ઞેયા હ્યાયુક્તિકાસ્તુ તાઃ ।
ઇત્યન્તઃપુરચારિણ્યઃ સ્ત્રિયઃ પ્રોક્તા સમાસતઃ ॥ ૬૪॥

વિશેષણવિશેષેણ તાસાં વક્ષ્યામિ વૈ દ્વિજાઃ ।
અનુરક્તાશ્ચ ભક્તાશ્ચ નાનાપાર્શ્વસમુત્થિતાઃ ॥ ૬૫॥

યા નિયુક્તા નિયોગેષુ કાર્યેષુ વિવિધેષુ ચ ।
ન ચોદ્ભટા અસંભ્રાન્તા ન લુબ્ધા નાપિ નિષ્ઠુરાઃ ॥ ૬૬॥

દાન્તાઃ ક્ષાન્તાઃ પ્રસન્નાશ્ચ જિતક્રોધા જિતેન્દ્રિયાઃ ।
અકામા લોભડીનાશ્ચ સ્ત્રીદોષૈશ્ચ વિવર્જિતાઃ ॥ ૬૭॥

સા ત્વન્તઃપુરસંચારે યોજ્યા પાર્થિવવેશ્મનિ ।
કારુકાઃ કઞ્ચુકીયાશ્ચ તથા વર્ષવરાઃ પુનઃ ॥ ૬૮॥

ઔપસ્થાયિકનિર્મુણ્ડા સ્ત્રીણા પ્રેષણકર્મણિ ।
રક્ષણં ચ કુમારીણાં બાલિકાનાં પ્રયોજયેત્ ॥ ૬૯॥

અન્તઃપુરાધિકારેષુ રાજચર્યાનુવર્ત્તિનામ્ ।
સર્વવૃત્તાન્તસંવાહાઃ પત્યાગારે નિયોજયેત્ ॥ ૭૦॥

વિનીતાઃ સ્વલ્પસત્ત્વા યે ક્લીબા વૈ સ્ત્રીસ્વભાવિકાઃ ।
જાત્યા ન દોષિણશ્ચૈવ તે વૈ વર્ષવરાઃ સ્મૃતાઃ ૭૧॥

બ્રહ્માણાઃ કુશલા વૃદ્ધાઃ કામદોષવિવર્જિતાઃ ।
પ્રયોજનેષુ દેવીનાં પ્રયોક્તવ્યા નૃપૈઃ સદા ॥ ૭૨॥

એતદષ્ટાદશવિધં પ્રોક્તમન્તઃપુરં મયા ।
અતઃ પરં પ્રવક્ષ્યામિ બાહ્યં પુરુષસંભવમ્ ॥ ૭૩॥

રાજા સેનાપતિશ્ચૈવ પુરોધા મન્ત્રિણસ્તથા ।
સચિવાઃ પ્રાડ્વિવાકાશ્ચ કુમારાધિકૃતાસ્તથા ॥ ૭૪॥

એકે ચાન્યે ચ બહવો માન્યા જ્ઞેયા નૃપસ્ય તુ ।
વેશેષમેષાં વક્ષ્યામિ લક્ષણેન નિબોધત ॥ ૭૫॥

બલવાન્ બુદ્ધિસમ્પન્નઃ સત્યવાદી જિતેન્દ્રિયઃ ।
દક્ષઃ પ્રગલ્ભો ધૃતિમાન્ વિક્રાન્તો મતિમાઞ્છુચિઃ ॥ ૭૬॥

દીર્ઘદર્શી મહોત્સાહઃ કૃતજ્ઞઃ પ્રિયવાઙ્મૃદુઃ ।
લોકપાલવ્રતધરઃ કર્મમાર્ગવિશારદઃ ॥ ૭૭॥

ઉત્થિતશ્ચાપ્રમત્તશ્ચ વૃદ્ધસેવ્યર્થશાસ્ત્રવિત્ ।
પરભાવેઙ્ગિતાભિજ્ઞઃ શૂરો રક્ષાસમન્વિતઃ ॥ ૭૮॥

ઊહાપોહવિચારી ચ નાનાશિલ્પપ્રયોજકઃ ।
નીતિશાસ્ત્રાર્થકુશલસ્તથા ચૈવાનુરાગવાન્ ॥ ૭૯॥

ધર્મજ્ઞોઽવ્યસની ચૈવ ગુણૈરેતેર્ભવેન્નૃપઃ ।
કુલીના બુદ્ધિસમ્પન્ના નાનાશાસ્ત્રવિપશ્ચિતાઃ ॥ ૮૦॥

સ્નિગ્ધા પરેરહાર્યશ્ચ ન પ્રમત્તાશ્ચ દેશજાઃ ।
અલુબ્ધાશ્ચ વિનીતાશ્ચ શુચયો ધાર્મિકાસ્તથા ॥ ૮૧॥

પુરોધો મન્ત્રિણસ્ત્વેભિર્ગુણૈર્યુક્તા ભવન્તિ હિ ।
બુદ્ધિમાન્નીતિસમ્પન્નસ્ત્યક્તાલસ્યઃ પ્રિયંવદઃ ॥ ૮૨॥

પરરન્ધ્રવિધિજ્ઞશ્ચ યાત્રાકાલવિશેષવિત્ ।
અર્થશાસ્ત્રાર્થકુશલો હ્યનુરક્તઃ કુલોદ્ભવઃ ॥ ૮૩॥

દેશવિત્કાલવિચ્ચૈવ કર્તવ્યઃ ક્ષિતિપૈઃ સદા ।
વ્યવહારાર્થતત્ત્વજ્ઞા બુદ્ધિમન્તો બહુશ્રુતાઃ ॥ ૮૪॥

મધ્યસ્થા ધાર્મિકા ધીરાઃ કાર્યાકાર્યવિવેકિનઃ ।
ક્ષાન્તા દાન્તા જિતક્રોધા સર્વત્ર સમદર્શિનઃ ॥ ૮૫॥

ઈદૃશઃ પ્રાડ્વિવાકાસ્તુ સ્થાપ્યા ધર્માસને દ્વિજાઃ ।
ઉત્થિતાશ્ચ પ્રમત્તાશ્ચ ત્યક્તાલસ્યા જિતશ્રમાઃ ॥ ૮૬॥

સ્નિગ્ધા શાન્તા વિનીતાશ્ચ મધ્યસ્થા નિપુણાસ્તથા ।
નયજ્ઞા વિનયજ્ઞાશ્ચ ઊહાપોહવિચક્ષણાઃ ॥ ૮૭॥

સર્વશાત્રાર્થસમ્પન્નાઃ કુમારાધિકૃતાસ્તથા ।
બૃહસ્પતિમતાદેષાં ગુણાંશ્ચાભિકાંક્ષયેત્ ॥ ૮૮॥

વિજ્ઞેયં ચોપહાર્યં ચ સભ્યાનાં ચ વિકલ્પનમ્ ।
ઇત્યેષ વો મયા પ્રોક્તઃ પ્રાડ્વિવાકનિર્ણયઃ ॥ ૮૯॥

અત ઊર્ધ્વં પ્રવક્ષ્યામિ ચિત્રાભિનયનં પુનઃ ॥

ઇતિ ભારતીયે નાટ્યશાસ્ત્રે પુંસ્ત્ર્યુપચારો
નામાધ્યાયશ્ચતુર્વિંશઃ ॥

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

*Natya Shastra Chapter 24*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*